IJIRSET
International Journal of Innovative Research in
SCIENCE | ENGINEERING | TECHNOLOGY

e-ISSN: 2319-8753 | p-ISSN: 2347-6710



# INTERNATIONAL JOURNAL OF INNOVATIVE RESEARCH

## IN SCIENCE | ENGINEERING | TECHNOLOGY

**Volume 11, Issue 2, February 2022**

INTERNATIONAL STANDARD SERIAL NUMBER INDIA

**Impact Factor: 7.569**

9940 572 462 | 6381 907 438 | ijirset@gmail.com | www.ijirset.com

International Journal of Innovative Research in Science, Engineering and Technology (IJIRSET)

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

# रघुवंश महाकाव्य में गो सेवा और भक्तिः वर्तमान की आवश्यकता

**DR. SHAILJA RANI AGNIHOTRI**

ASSOCIATE PROFESSOR, SANSKRIT, S.D. GOVT. COLLEGE, BEAWAR, INDIA

सारः रघुवंशं महाकविकालिदासेन विरचितं किञ्चन महाकाव्यमस्ति। तत् एकोनविंशति(१९)-सर्गात्मकं लालित्यपूर्णं महाकाव्यम्। रघुवंशस्य कथावस्तु सूर्यवंशस्य राज्ञां वर्णनाधारितम् अस्ति। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता अस्ति। तदुत्तरं रामवंश्यानां तत्तन्नृपाणां चरितानि उपन्यस्तानि। अन्तिमः सर्गः अग्निवर्णस्य गर्भवत्याः महाराज्ञ्याः शासनाचरणेन समं समाप्यते। कालिदासः अग्निवर्णपरवर्तिनां राज्ञाम् अपि वर्णनं चिकीर्षति स्म, परम् असौ कालेन कवलीकृतः इति किंवदन्ती। तथा च कालिदासेन परतः अपि रघुवंशस्य सर्गाः लिखिताः; परन्तु ते न प्राप्यन्ते इत्यपि प्रसिद्धिः। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः सह भेदः आपतति, परन्तु वायुपुराण-वर्णितानुसारं रामवंशावल्या सह रघुवंशवर्णित-वंशावली भूयसा सामञ्जस्यं धारयति।
रघुवंशं सूर्यकुलोत्पन्नानां भूपतीनां चरितकथनात्मकं वर्तते। दिलीपपुत्रस्य रघोर्नाम्ना सकल एव सूर्यवंशो रघुवंश इति ख्यातिं गतः। सूर्यवंशस्य रघुनाम्ना प्रसिद्धेः कारणं महाकविकालिदासः वर्णयति यत्,
ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्ज्जितवीरशब्दः।
वंशस्य कर्त्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे।।[१] इति।

परिचय

महाकाव्यत्वेन

महाकाव्यस्य लक्षणानुसारं यानि लक्षणानि आवश्यकतानि, तानि रघुवंशे दरीदृश्यन्ते। महाकाव्यस्य लक्षणानुसारम् अस्मिन् रघुवंशे एककुलोत्पनाः बहवः पृथ्वीपालाः वर्णिताः। अस्मिन् अङ्गी वीरो रसः। शृङ्गार-करुण-शान्तादयः रसाः, नाटकस्य सन्धयः च अङ्गानि यथास्थाने विहिताः। इदं च रामायणादिरूपाम् इतिहासकथाम् आश्रित्य प्रणीतम्। अत्र परमानन्ददायकाः धर्मार्थकामोक्षरूपाश्चत्वारो वर्गाः विहिताः। प्रारम्भेऽस्मिन् पार्वती-परमेश्वरयोः नमस्कारात्मकं मङ्गलाचरम् अस्ति। सर्गाणाम् आदिमध्येषु एकविधम् अन्तेषु अन्यविधं वृत्तम् अस्ति। नातिस्वल्पाः नातिदीर्घाश्चात्र ऊनविंशतिः सर्गाः। नवमसर्गे चान्यत्र क्वचित् क्वचित् नानावृत्तमयानि अपि पद्यानि सन्ति, प्रत्येकं सर्गान्ते भाविसर्गकथा सङ्केतिता। महाकाव्ये कथनीयाश्च सन्ध्यासूर्येन्दुरात्रिप्रदोषादयः सर्व एव विषयाः यथास्थानां वर्णिताः।

लेखकपरिचयः [1]

कालिदासस्य विषये अनेकाः प्रवादाः प्रसिद्धाः सन्ति। मिथिलायां प्रवादः अस्ति यत्, कालिदासः मिथिलायाः निवासी आसीत्।[२] दक्षिणप्रान्ते अपि कश्चन प्रवादः अस्ति यत्, सः दक्षिणात्यः आसीत् इति।[३] वङ्गप्रदेशे रङ्गपुरे समानः प्रवादः अस्ति।[४] सः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत् इति मन्यते।[५]

टीकाः[1,2,3]

भारतीयैः, पाश्चात्यैः च विद्वद्भिः कृताः रघुवंशस्य अनेकाः टीकाः समुपलभ्यन्ते। तासु मल्लिनाथसूरेः टीका प्रसिद्धा। तस्याः नाम सञ्जीवनी-टीका इति। हिन्दीभाषायाम् अपि रघुवंशस्य टीका वर्तते, यस्याः नाम भावर्थदीपिकाभाषाटीका इति। अस्याः हिन्दीटीकाकारः पण्डितज्वालाप्रसादमिश्रः वर्तते। हिन्द्यां रघुवंशस्य मणिप्रभाटीका अपि वर्तते, यस्याः टीकाकारः श्रीहरगोविन्दमिश्रः।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

प्रथमसर्गः
मङ्गलाचरणं, प्रस्तावना च
महाकविः कालिदासः शिवाशिवौ नत्वा रघुवंशस्य आरम्भं करोति। तत्र उपमालङ्कारस्य माध्यमेन सः कथयति यत्, अहं विशिष्टशब्दार्थयोः सम्यग्ज्ञानार्थं शब्दार्थाविव नित्यसम्मिश्रौ संसारस्य मातापितरौ शिवाशिवौ भक्त्या नमस्करोमि इति। एवं पार्वतीपरमेश्वरौ प्रसन्नौ भूत्वा तस्मै काव्यरचनायै शक्तिं दद्यास्ताम् इति प्राथ्यते।[६]
ततः रघुवंशीयानां राज्ञां प्रशासां कुर्वन् सः तेषां वर्णनेन स्वस्य असमर्थतां घोषयति।[७] असमर्थतायां सत्याम् अपि अहं तेषां वर्णनं कर्तुं प्रयत्नं कुर्वन् अस्मि इत्युक्त्वा सः रघुवंशीयानां राज्ञां गुणानां वर्णनम् आरभते। प्रप्रथमं सः वैस्ववतमनोः उल्लेखं कृत्वा तस्य वंशे चन्दसमानः दलीप-नामकः राजः समुद्भूतः इत्युक्त्वा दिलीपस्य वर्णनम् आरभते।

दिलीपाख्यानस्य आरम्भः
रघुवंशे दिलीपस्य पिता कः इति प्रारम्भे न उल्लिखितम्। प्रारम्भे तु वैवस्वत-नामकस्य मनोः कुले चन्द्रसमानः दिलीपः समुत्पन्नः इत्येव उल्लिखितम् अस्ति। परन्तु अग्रे सङ्केतः प्राप्यते यत्, इक्ष्वाकुवंशे उत्पन्नः कुकुस्थराजानः अभूवन्, येषाम् आरम्भिकं राज्यम् उत्तरकोसलः आसीत्। इक्ष्वाकोः पुत्रः पुरञ्जयः अभवत्। तस्य अपरं नाम कुकुस्थः इति। तस्य पुरञ्जयस्य पुत्रः दिलीपः अभवत् इति।[८][९] तस्य शरीरं बलिष्ठं वर्णितम् अस्ति। शासकत्वेन सः केवलं प्रजानां हिताय एव करं स्वीकरोति स्म।[१०] तस्य गुणवर्णनं कुर्वन् कालिदासः तं विनम्र, अपकारसहिष्णुः, दानी, धर्मप्रियः, कृषिप्रियः च उक्तः।[११] तस्य राज्ये चौरकर्मस्य सम्पूर्णतया अभावः अपि उक्तः तेन। तस्य राज्यं परितः समुद्रः एव आसीत्। अर्थात् सम्पूर्णः जम्बूद्वीपः। तादृशं विशालं राज्यं सः नगरवत् सञ्चालयति स्म।[१२] यद्यपि दिलीपस्य अनेकाः राज्यः आसन्, परन्तु सः सुरक्षिणायाः गर्भात् पुत्रोत्पत्तिम् इष्टवान्। अतः मन्त्रिभ्यः शासनस्य कार्यभारं दत्त्वा आदिनं यात्रां कृत्वा च सायङ्काले सपत्निकः सः कुलगुरोः वसिष्ठस्य आश्रमम् अगच्छत्। विसिष्ठर्षेः सर्वेऽपि ऋषिगणाः सपरिवारं दिलीपसुदक्षणयोः स्वागतं कुर्वन्ति।[4,5,6] अनेन सह कालिदासेन आश्रमस्य वातावरणस्य अपि प्राकृतिकसौन्दर्यं प्रकटनाय वर्णनं कृतम् अस्ति। ततः तौ दम्पती सपत्नीं गुरुवसिष्ठं प्रणामं कुरुतः। तौ ऋषिदम्पती दिलीपसुदक्षिणाभ्याम् आशीर्वादं यच्छतः च।

दिलीपः कथयति यत्, हे ऋषे! भवतः आशीर्वादेन राज्य-प्रजा-सम्पतयः सुरक्षिताः, वर्धमानाः च सन्ति। परन्तु मम कुलाय तर्पणदाता पुत्रः एतावता न प्राप्तः। अतः अहं दुःखितः अस्मि। अतः पितृणाम् ऋणनिर्मोक्षसाधनं सुतं प्राप्नोमि, तथा विधानं करोतु कृपया इति। इत्थं सन्तानाभावदुःखं कथितवति राजनि स महर्षिः वसिष्ठः समाधिना निर्मालितनयनः सन् प्रशांन्तमीनसञ्चारो महासरोवर इव अचलगम्भीरभावेन क्षणकालं तस्थौ (स्थितवान्)।[१३] एवं ध्यानेन दिलीपस्य सुतोत्पतौ स्तम्भरूपं (विघ्नरूपं) कारणं सः वदति, "हे नृप! त्वम् एकदा इन्द्रलोकं गत्वा भगवन्तं वज्रपाणिं (इन्द्रं) समुपास्य यदा नरलोकं पृथ्वीं प्रति प्रत्यागमनाय प्रवृत्तः आसिः, तदा ते मार्गे सुरभिः नाम कामधेनुः पारिजातकच्छायायां स्थिता आसीत्। तदा इयं तव महिषी सुरक्षिणा ऋतुस्नानं कृत्वा त्वत्समागमनं प्रेक्षणमाणा आसीत्, त्वम् अपि ऋतुसमयस्य अनुष्ठाने पापं स्यात् इति सुदक्षिणामेव चेतसा स्मरन् प्रदक्षिणार्हां तां कामधेनुं प्रदक्षिणादिभिः सम्मानयितुं विस्मृतवान्, तदेव स्तभरूपं तव कर्म वर्तते। यतो हि तस्य कर्मणः रुष्टा सती सा धेनुः त्वां शप्तवती। मां तिरस्कृत्य गच्छन् असि, परन्तु मत्सुतस्य आराधनम् अकृत्वा न ते सुतो भविष्यति इति [१४] शापः त्वया, तव सारथिना च नद्याः भयङ्करशब्दत्वात् न श्रुतः। सा कामधेनुः तु अधुना पाताले जायमाने यज्ञे उपस्थिता, परन्तु तस्याः पुत्री अत्र विद्यते। तस्याः सुरभिकन्यायाः सपत्निकः सेवां कृत्वा मनोवाञ्छितं वरं प्राप्तुं शक्नोति" इति।

यदा वसिष्ठर्षिः स्वस्य उक्तानि वचनानि दिलीपं कथयन् आसीत्, तदैव नन्दिनीनाम्नी कामधेनुकन्या वनात् प्रत्यागता। ततः महाकविः कालिदासः नन्दिन्याः वर्णनं श्लोकत्रयेषु करोति। ततः ऋषिः कथयति यत्, हे नृप!

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

तव मनोरथः शीघ्रमेव सफलो भवति इति नूनम् अवगच्छ यतः तव अन्वेष्टव्या इयं नन्दिनी नामोच्चारणमात्रम् एव सम्मुखे समुपस्थिता अस्ति। अधुना त्वम् एतस्याः अनुसरणं कृत्वा तां प्रसन्नां कुरु इति। ततः ऋषिः सुदक्षिणायाः कर्तव्यं वदन् कथयति यत्, तव स्त्री शुद्धान्तःकरणेन भक्तिभावेन अनुदिनं प्रातःकाले गन्धमाल्यादिभिः इमाम् अर्चयित्वा आश्रमपर्यन्तम् अनुव्रजेत्, सन्ध्यासमये पुनरपि आश्रमनिकटपर्यन्तं गत्वा इमां नमस्कृत्य आनयेत् इति।[१५] यावदियं गौः त्वयि प्रसन्ना न भवति, तावत्त्वं मम कथनानुसारेण एतस्याः परिचर्यां कुरु, तव पिता यथा पुत्ररत्नत्वेन त्वां प्राप्य सौभाग्यशाली परिगण्यते, तथैव त्वमपि त्वत्सदृशसुतरत्नस्य लाभेन पुत्रसौभाग्ये अग्रगण्यो भव इति। ततश्च गुरोः आज्ञां प्राप्य गुरुणा व्यवस्थापिते कुटिरे तौ दम्पती शयनं कृत्वा प्रातः आश्रमस्थानाम् ऋषिकुमाराणां वेदमन्त्राणां गानेन सह जागृतौ।

द्वितीयसर्गः[7,8,9]

द्वितीये दिने प्रभाते नन्दिन्याः वत्सं दुग्धं पाययित्वा नृपमहिषी सुदक्षिणा मालाचन्दनादिभिः नन्दिन्याः अर्चनां करोति। सुदक्षिणया पूजितां तां नन्दिनीं यशःपरायणः दिलीपः वने स्वच्छन्दगमनाय मोचितवान्। ततः नन्दिन्याः पृष्ठे दिलीपः, तस्य पृष्ठे च सुदक्षिणा गच्छति। अग्रे आश्रमसीमायां सुदक्षिणां प्रतिप्रेषयित्वा दिलीपः नन्दिन्याः अनुसरणं करोति। आश्रमद्वारात् सुदक्षिणां, वनसीमातः स्वसेवकान् च दिलीपः अनुचलनात् निवारितवान्। एवं सः नन्दिन्याः पृष्ठे एकाकी एव अनुचलितवान्। वने स्वच्छन्दगम्यमानायाः नन्दिन्याः अनुसारणं कुर्वाणः दिलपीः सर्वाः क्रियाः नन्दिन्याः पश्चादेव करोति स्म। चलनं, विश्रामं, जलपानं च नन्दिन्याः अनन्तरमे सः करोति स्म। एवं कालिदासेन तस्य अनुसरणशीलतायै छायावत् अनुसरणस्य उपमा पदत्ता वर्तते।[१६]

वनस्थानां व्याघ्रादीनां हिंसकपशूनां प्रहारात् नन्दिन्याः रक्षणं कर्तुं राजा दिलीपः धनुष्काण्डैः सुसज्जः तस्याः अनुसरणं करोति स्म। आदिनं वनस्य विभिन्नभागेषु अटित्वा सायङ्काले नन्दिनी स्वतः आश्रमं प्रति यात्राम् आरब्धवती। एवं तौ उभौ आश्रमं प्राप्तवन्तौ। ततः आश्रमद्वारे सुदक्षिणा नन्दिन्याः पूजार्चनादिना स्वागतम् अकरोत्। नन्दिनी स्वस्य वत्सस्य दर्शनार्थं विह्वला आसीत्, तथाऽपि सा सुदक्षिणादिलीपयोः पूजां स्तब्धीभावेन स्वीकृतवती। ततश्च सा स्वस्य वत्सस्य पार्श्वे गतवती। दिलीपोऽपि वसिष्ठम्, अरुन्धतीं च भक्त्या प्रणम्य निजं सायमनुष्ठां कृत्वा च पुनः नन्दिन्याः सेवायामेव संयोजितः अभवत्। रात्रौ नन्दिन्याः पृष्ठतः तौ दम्पती क्रमेण तस्याः शयनोत्तरं निद्रां कृतवन्तौ, पातःकाले च जागरणोत्तरं जागृतः। एवं तौ एकविंशतिः दिनानि नन्दिन्याः सेवां कृतवन्तौ।

द्वाविंशे दिने नन्दिनी स्वसेवकस्य दिलीपस्य मनोगतं ज्ञातुम् इष्टवती लीलाम् अरचयत्। तस्मिन् दिने सा घोरवनं प्रविष्टवती। तत्रस्थं वातावरणं रमणीयम् आसीत्, अतः दिलीपः क्षणं यावत् नन्दिनीम् अदृष्ट्वा प्रकृतिं पश्यन् आसीत्। तस्मिन्नेव समये कश्चन सिंहः नन्दिन्याः उपरि आक्रमणम् अकरोत्। यतो हि दिलीपः प्रकृतिदर्शने निमग्नः आसीत्, अतः सिंहस्य आक्रमणं तु सः न दृष्टवान्, परन्तु ततः स दृष्टवान् यत्, सः सिंहः नन्दिन्याः उपरि आक्रमणं कृतवान् इति। रक्तवर्णीयाः नन्दिन्याः शरीरोऽपरि आरूढवन्तं तं केसरसिंहं मारयितुं दिलीपः तूणीराद् बाणम् उद्धर्तुम् इष्टवान्। परन्तु बाणस्य मूलप्रदेशे (पुच्छस्य प्रदेशः) गृहीते सति सः दिलीपः चित्रलिखितः (like image) स्यात्, तथा स्थिरो अभवत्। सम्मुखे स्थितम् अपारधिनं सिंहं किमपि कर्तुं न शक्तवतः राज्ञः अन्तःकरणे उद्वेगः समुद्भूतः। सः सिहः उक्तवान् यत्, हे राजन्! तव श्रमेण किमपि न भविष्यति, वृक्षान् उच्छेदयितुं समर्थः वायुः पर्वतस्य किमपि कर्तुं प्रभवति। महादेवः यदा श्वेतवर्णीये वृषभे आरोढुम् इच्छति, तदा निकुम्भनामकस्य सेवकस्य पृष्ठोपरि चरणं निधाय आरोहति। तस्य निकुम्भस्य मित्रम् अहं कुम्भोदरः शिवकिङ्करः अस्मि। तव अग्रे यः देवदारोः वृक्षः अस्ति, सः शिवेन पुत्रत्वेन स्वीकृतः अस्ति। भवानी तस्मै तरवे सुवर्णघटेन जलं सञ्चति। एवं संवर्धितस्य अस्य देवदारोः त्वक् एकदा हस्तिनः कपोलघर्षणेन उन्मथिता। दैत्येन स्कन्दस्य शरीरे आघाते कृते सति यथा पीडा अनुभूता, तथैव एतस्य तरोः कृते पार्वत्या पीडा अनुभूता। तेन शिवेन अहं देवदारुवृक्षस्यास्य रक्षायै नियुक्तः। कालबद्धा (यमेन बद्धा)

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

एषा अत्र मम बुभूक्षां शमयितुम् उपस्थिता वर्तते। शस्त्रैः रक्षणं कर्तुं यत् वस्तु भवति, तस्य रक्षायाम् असमर्थे सति मानभङ्गः न भवति। अतः लज्जां त्यक्त्वा प्रतिगच्छ इति।

बाणसञ्चालने निष्फलः राजा दिलीपः उक्तवान् यत्, हे सिंह! जडचेतनानाम् उत्पत्तिप्रलयसंहारहेतुः स शिवः मे माननीयः। [10,11,12]परन्तु अग्नौ आहुतिदातुः गुरोः धनस्य नाशं द्रष्टुं न शक्नोम्यहम्। समीपे आगतस्य जीवस्य शरीरेण उपजीव्यमानः त्वं मदीयेन देहेन उपजीव्य प्रसन्नो भव। परन्तु पुत्रमिलनोत्सुकाम् एतां वसिष्ठधेनुं मोचय इति। दिलीपस्य वचनं श्रुत्वा अट्टहास्यं कुर्वन् सिंहः उक्तवान् यत्, राजन्! त्वं तु विवेकहीनः प्रतिभासि। एकच्छत्रं संसारस्य स्वामित्वं, नवयौवनम् इदं मनोहरं शरीरं च गोः कृते कुतः त्यक्तुम् इच्छसि? यदि प्राणिजातेषु दयैव वर्तते, तर्हि शरीरान्ते इयमेका एव धुनुः कल्याणवती भविष्यति। परन्तु हे प्रजानाथ! यदि त्वं मह्यं निजशरीरम् अदत्त्वा प्रतिगच्छसि, तर्हि चिरकालं यावत् विघ्नेभ्यः प्रजारक्षणं कर्तुं प्रभविष्यसि। यदि एकधेनुयुक्तस्य अग्निमूर्तेः गुरोः क्रोधात् त्वं बिभेषि, तर्हि कोटिशः घटोध्नीं (a cow having a full udder) दत्त्वा त्वं तस्य रोषं दूरीकर्तुं समर्थोऽसि। अतः स्वस्य शरीरस्य रक्षां कुरु। यतो हि समृद्धिशालि राज्यमेव स्वर्गम् उच्यते इति।
शिवानुचरस्य सिंहस्य आघातेन दुःखितां भयभीतनेत्रयुक्तां नन्दिनीं दृष्ट्वा दयालुः सः दिलीपः उक्तवान् यत्, किल नाशात्त्रायते इति क्षत्रवर्णस्य उन्नतः क्षत्रशब्दः लोकेषु प्रसिद्धिं गतः, तस्मात् विरुद्धस्य व्यवहारस्य पुनः शासनं कृत्वा किं करिष्यामि? जुपुप्सामलिनैः प्राणैः किं प्रयोजनम्? अन्यघटोध्नीनां दानात् महर्षेः क्रोधापनयः कथं नु शक्यः? हि इमां नन्दिनीं कामधेनोः तुल्यां जानीहि, महेश्वरस्य सामर्थ्येन एव त्वया अस्याम् आक्रमणं कृतम्। तादृश्याः एतस्याः नन्दिन्याः रक्षणं स्वदेहदानविनिमयेन त्वत्तः मोचनम् एव न्यायः भविष्यति। एवं कृते सति तव पारणा भविष्यति, वसिष्ठर्षेः च होमादिप्रयोजनं लुप्तं न स्यात्। भवान्नपि स्वाम्यादेशेन परतन्त्रोऽस्ति। अतः महान्प्रयासेन एतस्य देवदारोः रक्षणं करोति। रक्षणीयवस्तोः विनाशं प्रापय्य सेवकेन स्वयं व्रणरहितेन प्रभोः अग्रे स्थितिं कर्तुं न शक्यते इति। ततः सिंहस्य स्वस्योपरि तीव्राघातः स्यात् इति विचिन्यमाणः दिलीपः नतमस्तकः सन् अतिष्ठत्।

तस्मिन्नेव समये विद्याधरैः दिलीपस्योपरि पुष्पवर्षाः कृताः। हे पुत्र उत्तिष्ठ! इत्यमृतरसपूर्णं वचो निशम्य राजा दिलीपः यदोत्थितः सन् पश्यति, तदा तस्य सम्मुखे स्वां मातरमिव कामदुधा दृष्टा, सिंहस्तु लुप्तः आसीत्। यतो हि तत् सर्वं नन्दिन्याः माया आसीत्। यतो हि नन्दनी दिलीपस्य परीक्षां कर्तुम् इच्छति स्म। अतः सा उक्तवती यत्, वसिष्ठस्य प्रतापात् कालोऽपि मां प्रहर्तुम् असमर्थः, तर्हि अन्ये हिंसकानां का स्थितिः? वत्स! गरौ भक्त्या, मयि दयया च तुभ्यं प्रसन्ना अस्मि। ईप्सितं वरं याचस्व। मां केवलं दुग्धानां दात्रीं न विद्धि, किन्तु यदा प्रसन्ना भवामि, तदा मनोभिलषितं पूरयामि इति। तदा दिलीपः हस्ताञ्जलिं बध्वा कुलविस्तारस्य कृते सुदक्षिणायां कीर्तिमन्तं पुत्रम् अयाचत। अतः नन्दिनी तथास्तु इति प्रतिज्ञां कुर्वन्ती आदिष्टवती यत्, हे पुत्र! मम दुग्धं पलाशनिर्मिते पात्रे दुग्ध्वा पिब इति। तदा नृपः कथयति यत्, हे मातः! वत्सपानस्य शेषभूतम्, अग्निहोत्रात् अवशिष्टञ्च तव पयः पृथिव्याः षष्ठभागम् इव गुरोः आज्ञया पातुम् इच्छामि इति। ततः तौ आश्रमं प्राप्तवन्तौ। दिलीपस्य मुखाकृतिना एव वसिष्ठः धनोः अनुग्रहं ज्ञातवान् पश्चात् सुरक्षिणायै अपि दिलपीः वृत्तं श्रावयितवान्। ततः गुरोः आदेशं प्राप्य वत्सपानस्य, हवनस्य च अवशिष्टं धेनोः दुग्धं दिलीपः अपीबत्।

जितेन्द्रियस्य वसिष्ठस्य विधानानुसारं प्रातःकाले विधिपूर्वकं व्रतपारणां समाप्य प्रास्थानिकं स्वस्तिवचनं प्रयुज्य च तौ दम्पती राजधानीं प्रति प्रस्थितौ। राजधान्यां राज्ञः दिलीपस्य प्रजाभिः स्वागतं कृतम्। ततः दिलीपः राजकार्यस्य दायित्वं पुनः स्वीकृत्य शासने निरतः। कालान्तरे सुदक्षिणया अपि गर्भधारणं कृतम्।
तृतीयसर्गः

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

सगर्भायाः सुदक्षिणायाः सर्वाः इच्छाः दिलीपः पूरयति स्म। एवं तेन पुंसवनादयः विधयः अपि समापिताः। समये सञ्जाते अर्धरात्रौ सुदक्षिणया पुत्रः जनितः। यदा विश्वस्तः परिचारकः आगत्य कुमारजन्मनः वार्तां राज्ञे न्यवेदयत्, तदा राजा अमृतमिव वचनम् आकर्ण्य आत्मनः सर्वाण्येव आभूषणानि तस्मै प्रादात्, केवम् अत्युज्ज्वलं राजच्छत्रं चामरद्वयं च अदेयत्वात् तस्मै न प्रदत्तम्। पुत्रः मेऽयं स्वशक्त्या अशेषशास्त्रसागरस्य पारं गमिष्यति, सम्पूर्णशत्रुसैन्यव्यूहं च भित्त्वा गमिष्यति इति तस्य गमनशीलत्वं निश्चित्य स राजा स्वपुत्रस्य रघुः इति नामकरणम् अकरोत्।[१७] दिलीपः स्वपुत्रस्य प्राथमिकं शिक्षणम् अकरोत्। सः एव तस्मै वक्तुम्, अङ्गुलिं धृत्वा चलितुं, शिरसा प्रणामं कर्तुं च अशिक्षयत्। एवं पुत्रचेष्टाभिः अत्यन्तः हर्षितः दिलीपः रघुं धनुर्विद्याम् अपाठयच्च।[१८]

रघ्वाख्यानस्य आरम्भः

यथा शुक्लपक्षस्य प्रतिपच्चन्द्रः तेजोनिधेः सूर्यस्य किरणसम्पर्केण कलाभिः दिने दिने वर्द्धते, तथैव स कुमारोऽपि पितुः प्रयत्नेन मनोहरैः अङ्गैः दिने दिने वृद्धिङ्गतः। ततः कालान्तरे तस्य चूडाकरणसंस्कारः अभवत्। यथा मकरादिजलजन्तवः नदीम् आश्रित्य तेनैव पथा अनन्तसागरं गच्छन्ति, तथैव कृतचुडाकरणः रघुरपि समयवयस्कैः मनोहरैः सचिवसुतैः सह वर्णमालां यथाविधिः अभ्यस्य क्रमेण अनन्तशब्दशास्त्रस्य पारं गतवान्।[१९] ततः गर्भात् एकादशे वर्षे रघोः उपनयनसंस्कारः अभवत्।[२०] निपुणाः आचार्याः गुरुसेवकं तं रघुं विद्याः शिक्षितवन्तः। तथा च शीघ्रं हि सः विद्याचतुष्टयस्य ज्ञाता अभवत्। तेन धनुर्विद्यायाः अध्ययनकाले स्वपितुः दिलीपात् दिव्यास्त्राणां ज्ञानम् अर्जितम् असीत्। यथा वत्सतरः पूर्णयौवनः सन् महोक्षः भवति, यथा च करिशावकः पूर्णयौवनः सन् महागजो भवति, तथैव रघुः अपि क्रमेण पूर्णयौवनः सन् पुष्टावयवः महापुरुषाकृतिः जातः। ततः राजकन्याभिः सह रघोः विवाहः अभवत्। राजकुमारपदधर्त्ता रघुः नवनवतिवारं पितुः अश्वमेधयज्ञानाम् आश्वमेधिकानां रक्षणम् अकरोत्।

शततमे अश्वमेधावसरे दिलीपः यदा यज्ञाश्वम् अमोचयत्, तदा इन्द्रः अदृश्यरूपो भूत्वा धेनुर्भृतां रक्षिणाम् अग्रतः एव तम् अश्वम् अपहृत्य गतः। तस्मिन्नेव काले विसिष्ठर्षेः कामधेनुः नन्दिनी तत्र समुपस्थिता। तस्याः अङ्गनिष्यन्दजलेन (गोमूत्रेण) स्वनेत्रे प्रक्षाल्य तत्कालमेव परोक्षाणाम् अपि पदार्थानाम् अवलोकने समर्थः अभवत् रघुः।[२१] एवं प्राप्तदिव्यचक्षुः स रघुः पूर्वस्यां दिशि यावत् दृष्टिम् अकरोत्, तावत् दृष्टवान् यत्, पर्वतपक्षभेदी इन्द्रः अश्वम् अपहृत्य गच्छति, अश्वश्च तदीयरथरश्मिबद्धः परां चञ्चलतां प्रकटयति, सारथिः तं स्थिरीकर्तुं भूयोभूयो प्रयत्नं कुर्वन्नस्ति इति। ततः इन्द्रम् उद्दिश्य रघुः गम्भीरस्वरेण तं समबोधयत्। रघोः गम्भीरस्वरं श्रुत्वा भीतः इन्द्रोऽपि स्थिरः अभवत्।

रघुः तम् उक्तवान् यत्, अये देवेन्द्र! त्वम् एव यज्ञभागभुजां निर्जराणाम् अग्रगण्यो असीति पण्डिताः आहुः, पिता च मे भवताम् एव प्रीणनाय नित्यं यज्ञेषु दीक्षितः वर्तते। तत् कथं तस्यैव यज्ञकर्मणि विघ्नं करोषि त्वम्? यदि कोऽपि त्रिलोके धर्मकार्येषु विघातं करोति, तदा तस्य दमनं त्रिलोकिशासकेन सर्वसाक्षिणा त्वया एव करणीयम्। यदि त्वं स्वयं धर्मरक्षको भूत्वा सत्क्रियाः विहंसि, तर्हि धर्मानुष्ठानस्य लोपः भविष्यति। अत एव हे मघवन्! मम पितुः अश्वमेधयज्ञस्य प्रधानसाधनम् अश्वं मे देहि, भवादृशाः धर्ममार्गप्रचारकाः स्वयमेव कुत्सितमार्गे न खलु प्रवर्तन्ते? इति।[२२] रघोः मुखात् स्पर्धापूर्णानि वचनानि श्रुत्वा इन्द्रोऽपि रथं निवर्त्य तस्मै उत्तरं यच्छन् उक्तवान् यत्, अये राजकुमार! सत्यमुक्तं त्वया। किन्तु मादृशानां यश एव सर्वस्वं तव पिता यदि क्रतुशतं समापयेत्, तदा मे त्रिलोकिप्रख्यातं यशः विलुप्तं स्यात्, अतो येन केन प्रकारेण आत्मनो यशः रक्षणीयम्मया। संसारेऽस्मिन् यथा पुरुषोत्तमशब्दः नारायणाय, त्रिनेत्रशब्दः महेश्वाराय रूढोऽस्ति, तथैव शतक्रतुशब्दः मामेव बोधयति। एषः शब्दः द्वितीयगामी नास्ति। यतो हि केवलम् अहमेव शतक्रतुः अस्मि। पुरा यथा कपिलमुनेः कोपेन सगरस्य अश्वमेधः भग्नः अभवत्, तथैव अधुना मम क्रोधेन तव पितुः यज्ञः भग्नो भविष्यति। अतः अलं तव वृथापरिश्रमेण इति। तस्मै प्रत्युत्तरं यच्छन् रघुः सदर्पम् उक्तवान् यत्, हे पुरन्दर! यदि एवं ते सङ्कल्पः, तदा युद्धाय सज्जो भव।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

यावत् मां जेतुं न शक्नोषि तावत् कृतकार्यः (सफलः) न भविष्यसि इति। एवम् उक्त्वा रघुः तस्य सम्मुखे धनुष्काण्डैः युद्धाय सज्जः उपस्थितः। इन्द्रोऽपि तेन सह युद्धाय सज्जो सन् स्वस्य धनुषि अमोघं शरं संहितवान्। पूर्वं कदाऽपि असुरं विहाय मनुष्ये तस्य शरस्य उपयोगः न कृतः इन्द्रेण।[२३] इन्द्रः अमोघास्त्रस्य प्रयोगं कुर्यात् तस्मात् प्रागेव रघुणा इन्द्रस्योपरि प्रहारः कृतः, यस्मिन् इन्द्रस्य भुजा रक्तचिह्निता अभवत्। ततश्च द्वितीयशरेण रघुणा इन्द्रस्य वज्रसदृशः ध्वजः स्वगतः (स्वाधीनः) कृतः। सर्वप्रयत्नेन अपि इन्द्रः रघुं किमपि कर्तुम् असमर्थः आसीत्। ततः रघुः इन्द्रस्य धनुः एव स्वबाणाघातेन अभङ्गयत्। अतः इन्द्रः वज्रम् उत्थाप्य रघोः वक्षस्थले प्राहारयत्। तेन आघातेन रघुः पृथिव्याम् अपतत्। तस्य पतनं दृष्ट्वा तस्य सैनिकेषु महान् उद्वेगः समुत्पन्नः, परन्तु समनन्तरमेव रघुः वज्रवेदनां विहाय उत्थितवान्। तेन सर्वैः सैनिकैः सिंहघोषः कृतः। इन्द्रस्य वज्रस्य कठोराघातेषु सत्सु अपि रघोः अत्यन्तं प्राक्रमं दृष्ट्वा इन्द्रः सन्तुष्टः। अतः स उक्तवान्,[1] हे राजकुमार! यतः पर्वतपक्षान् अपि विभक्तवान्, त्रिलोके कोऽपि यस्य प्रहारं सोढुं न शक्नोति, तादृशं वज्रम् अपि त्वं व्यर्थम् अकरोः। अतः तव पराक्रमातिशयेन प्रसन्नोऽहं तुभ्यं तुरङ्गं (अश्वं) वर्ज्जयित्वा यत्किमपि दातुं शक्नोमि इति। इन्द्रस्य मनोहरं वचनं श्रुत्वा रघुः तुणिरे बाणं पुनस्स्थाप्य उक्तवान् यत्, हे इन्द्र! यदि अश्वप्रत्यप्रणं कर्तुं नेच्छसि, तर्हि यथा मे पिता इदम् अश्वं विनापि अस्य अश्वमेधयज्ञस्य सम्पूर्णं फलं लभेत, तथा विधीयाताम्। एवञ्च सभायां शिवांशत्वेन दुःसहः महाराजः दिलीपः स्थितः अस्ति, तस्मै तव दूतः इदं वृत्तान्तं श्रावयेत् तथा विधीयताम् इति। "तथैव भविष्यति" इति सङ्कल्पं कृत्वा इन्द्रः स्वस्थानं गतः। रघुः अपि सभां प्रति गतः। रघोः आगमनात् प्रागेव दिलीपः पुरन्दरदूतमुखात् सर्वं वृत्तान्तं ज्ञातवान् अधुना समीपमागतं तं सुतमालिङ्गनादिभिः अभिनन्दितवान् च। वज्रप्रहरव्रणयुक्तं सुतं सदयं स्पृशन् आनन्दयुक्तो अभवत् सः। एवं कृत्वा स्वर्गारोहणस्य इच्छुकः राजा नवनवतिः महायज्ञानां पङ्क्तिं पूर्णाम् अकरोत्। अथ स वृद्धो राजा सुयोग्यं पुत्रं रघुं साम्राज्ये अभिषिच्य सर्वाश्च विषयान् सन्त्यज्य परमपुरुषार्थलाभाय सस्त्रीकः तपोवने वासम् अकरोत्। यतः वार्धक्ये इक्ष्वाकुकुलोत्पनानाम् स एव कुलाचारः आसीत्।

चतुर्थसर्गः

दिलीपस्य शासनकाले एव शत्रूणां हृदयेषु दुःखाग्निः ज्वलनोन्मुख इव आसित्। अथ रघौ सिंहासनारूढे सति तु सः प्रज्वलित इव अभवत्। अतः ते नवराजानं रघुम् उच्चाटयितुम् आक्रमणम् अकुर्वन्। परन्तु दिग्विजयाभियाने शत्रुनिराकरणाय रघुः सङ्कल्पम् अकरोत्। ततः सः रघुः प्रथमं स्वीयराष्ट्रदुर्गाणां पृष्ठदेशस्य च सर्वथा रक्षां कृत्वा यात्रकालोचितं सम्पूर्णं मङ्गलं विधाय षड्विधं बलमादाय दिग्जिगीषया प्रस्थानम् अकरोत्। रघुणा प्रप्रथमं पूर्वा दिक् जेतुं प्रयत्नः कृतः।[२४] जयशीलः सः रजा पूर्वदिशः राज्यानि जित्वा ताल-तरुपङ्क्तिभिः श्यामवर्णीयं वनं यत् महासमुद्रस्य तटप्रान्ते अस्ति, तत्र प्राप्तवान्। नदीस्त्रोभिमुखं प्रणतान् वैतसान् यथा भयङ्करोऽपि नदीप्रवाहो नैव समुन्मूलयति, तथैव रघुः प्रणतान् सुह्मदेशीयान् नृपान् नैव उत्पाटितवान्। वङ्गदेशीयाः भूपाः रणतरीः सज्जीकृत्य युद्धे प्रवृत्ताः अभूवन्, रघुरपि सर्वांस्तान् निर्जित्य गङ्गाप्रवाहमध्यगतेषु देशेषु विजयस्तम्भान् आरोपयत्।[२५] वङ्गप्रदेशस्य राजभिः सह यानि युद्धानि जातानि, तेषु सर्वे राज्ञः पराजिताः। परन्तु तान् पदभ्रष्टान् अकृत्वा रघुः तेभ्यः सम्मानितं पदं दत्तवान्।

ततः स्वस्य दिग्विजयाभियानम् अग्रे सरयन् रघुः निजहस्तिपरम्पराभिः कपिशां नदीं तीर्त्वा उत्कलैः राजभिः सन्दर्शितमार्गः सन् कलिङ्गदेशं जेतुम् अगच्छत्। अपरत्र कलिङ्गनाथोऽपि युद्धाय सज्जः आसीत्। धर्मार्थविजयशीलः स रघुः प्रथमम् उद्धतभावेन युद्धाय प्रवृत्तं तं कलिङ्गनाथं बन्दीकृत्य पश्चात् तं मोचयित्वा तस्य श्रियम् एव व्यपनयत्, राज्याधिकारं तु न हृतवान्। अयत्नसिद्धविजयी रघुः पूर्वदिशां निर्जित्य फलभिरनताभिः पूगवृक्षपङ्क्तिभिः परिशोभितेन सागरतटेन दक्षिणां दिशम् अगच्छत्। दक्षिणदिशि प्रयातस्य रघोः प्रतापः पाण्डुदेशीयाः नृपाः सोढुम् असमर्थाः आसन्। अतः ते तस्य चरणमले प्रणताः। एवं मलय-दुर्दराख्ययोः पर्वतयोः समीपस्थानि राज्यानि निर्जित्य सागरात् दूरे स्थितं सह्यपर्वतम् अलङ्घयत्।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |
||Volume 11, Issue 2, February 2022||
|DOI:10.15680/IJIRSET.2022.1102134|

केरलप्रदेशस्य मुरलानद्याः तटमार्गेण पारसीकान् यवनान् जेतुं गतः। तत्र अश्वसैन्यसहायैः यवननृपतिभिः सार्द्धं रघोः घोरः सङ्ग्रामः जातः। रघुणा भल्लास्त्रैः खण्डशः कृतानि श्मश्रुमण्डितानि यवनशिरांसि मधुमक्षिकायुक्तानि क्षौद्रपटलानीव समरभूमिम् आच्छादितानि। शेषाः यवनाः प्रार्थनादर्शनार्थं स्वमस्तेभ्यः उष्णीषान् दूरीकृत्य तस्य शरणं स्वीकृतवन्तः। ततः रघुः उत्तरदिशं प्रति गतः। सिन्धूनद्याः तीरे तेन विश्रामः कृतश्च। तत्र हूणजातीयम्लेच्छानां नाशने रघुः घोरं पराक्रमं दर्शितवान्। कम्बोजदेशस्य राजानः युद्धे तस्य रघोः पराक्रमं सोढुं न शक्तवन्तः। ते पराजिताः कम्बोजदेशीयाः राजानः उत्तमाश्वादिभिः उपहारैः कोसलस्वामिनः रघोः समीपे उपस्थिताः।

ततः अश्वसैन्यसहायः सन् रघुः पर्वतीयगणान् जेतुं हिमालयम् आरूढवान्। तत्र तस्य युद्धम् उत्सवसङ्केताख्य-म्लेच्छजातीनां गणैः सह भयङ्करं युद्धम् अभवत्। तस्याः म्लेच्छजात्याः सप्तसमूहाः आसन्। ते सर्वेऽपि रघोः शरणं स्वीकृतवन्तः। हिमालयात् अवतीर्य लौहित्यनदीम् उल्लङ्घ्य प्राग्जोतिषदेशं प्राप्तवान्। तस्य प्रदेशस्य राज्ञा सह युद्धं कृत्वा तं पराजितवान्। एवं चतुर्षु दिग्क्षु विद्यमानानां राज्यानां विजयोत्तरं रघुः दिग्विजयाभियानात् निवृत्तः। ततः सः विश्वजितयज्ञम् अकरोत्। विश्वजितयज्ञस्य परिसमाप्तौ सत्कारेण सह पराजितान् राज्ञः मोचयितवान् च। विश्वजितयज्ञे स्वस्य सर्वं धनं रघुः दानम् अकरोत्।

पञ्चमसर्गः

विश्वजितयज्ञोऽत्तरं सर्वं धनं दानत्वेन दत्तवतः रघोः पार्श्वे कौत्सर्षिः १४ कोटिः सुवर्णमुद्राः दानत्वेन स्वीकर्तुम् उपस्थितः। सः कौत्सर्षिः वरतन्तुमहर्षेः शिष्यः आसीत्, यः चुतुदर्शविद्यासु पारङ्गतः आसीत्। शरणागतरक्षकः रघुः यज्ञे सर्वस्वदानात् धातुपात्राभावात् मृन्मये पात्रे पूजार्थम् उपकरणं समादाय विद्यासम्पन्नम् अभ्यागतं तं कौत्सं प्रति अगच्छत्। सः वेदशास्त्रसम्पन्नं तं कौत्सं श्रौतेन विधिना सत्कृतवान्। पश्चात् समीपे सुखासीने तस्मिन् बद्धाञ्जलिः सन् आगमनस्य प्रयोजनं अपृच्छत्। सः उक्तवान् यत्, हे सूक्ष्मबुद्धे ब्रह्मन्! रविः यथा अन्धकारान्धं लोकं प्रकाशेन उद्बोधयति, तथा अज्ञानतिमिरान्धं त्वां यः ज्ञानप्रकाशेन उद्बोधितवान् स वेदनिधिः ते गुरुः कुशली अस्ति? तस्य गुरोः तपसि विघ्नं तु न समुद्भूतम् अस्ति खलु? भवद्भिः आलवालबन्धनजलसेचनादिभिः उपायैः सुतसदृशप्रेम्णा संवर्धिताः ये आश्रमवृक्षाः फलच्छायादानेन श्रान्तानां सकलसन्तापम् अपहरन्ति, तान् दावानलवात्यादिः उपद्रवः न बाधते किञ्चित्? आश्रमस्थाः हिरणाः कुशलाः सन्ति खलु? आश्रमस्थानि नदीसलिलानि तु शिवानि सन्ति खलु? धान्यं तु सुरक्षितम् अस्ति खलु? तव गुरुः उत्तमविद्यायाः दानं कृत्वा तुभ्यं लोकोपकारकं गृहस्थाश्रमं प्रवेष्टुम् अनुमतिं दत्तवान्। यतो हि तव गृहस्थाश्रमस्य कालः समुद्भूतः अस्ति। किं त्वं गुरोः आज्ञया उत स्वेच्छया अत्र समागतः? इति।

रघोः उदारवचनानि श्रुत्वा मृन्मयम् अर्घ्यपात्रं दृष्ट्वा च स्वस्य अर्थप्राप्तेः उद्देशस्य नैष्फल्येन हताशः कौत्सः वदयति यत्, हे राजन्! भवतः स्वामित्वे अस्माकं सर्वं कुशलम् अस्ति। पूज्यानां भक्तिः तव कुलपरम्परा अस्ति। तस्याः भक्त्याः आचरणेन त्वया पूर्वपुरुषाः अतिक्रमिताः। अहं याचकत्वेन कुसमये एव तव पार्श्वे समुपस्थितः। एष एव मे विषादः। त्वया तु स्वस्य सर्वं धनं दानत्वेन प्रदत्तम्, अतः अहम् अन्यत्र गुरुप्रयोजनं सिद्धं कर्तुं प्रयासं करिष्ये। यतो हि चातकोऽपि जलरहितेभ्यः जलदेभ्यः जलं न याचते इति। एवम् अभिधाय प्रस्थानोद्यते कौत्से राजा तं गमनात् निवार्य्य विनयपूर्वकम् अपृच्छत्, अयि वेदविदांवर! किं स्वरूपा ते गुरुदक्षिणा, किं वा तस्याः मानम् इति।

ततः कौत्सः सम्पूर्णां कथां श्रावयति। सः कथयति यत्, अहं महर्षेः सकाशात् विद्याः समधिगम्य दक्षिणार्थं गुरुम् अनुरुद्धवान्, महर्षिः अपि स्नेहाद् अवदत्, वत्स! ते दृढतया भक्त्या प्रीतोऽस्मि किं दक्षिणया? इति। तथाऽपि अहं तद्ग्रहणाय गुरुम् अत्यन्तम् उपरुद्धवान्। तदा सः रोषात् उक्तवान् यत्, त्वया मत्तः चतुर्दश विद्याः अधीताः,

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

अतः मे विद्यया परिसङ्ख्यया चतुर्दशकोटिसुवर्णं दीयताम् इति। परन्तु भवान् केवलं नाममात्रम् एव राजा अस्ति। भवतां सम्पूर्णः कोषागारस्तु रिक्तः अस्ति, अतः मम कोऽपि उपरोधः अनुचतः भविष्यति इति। एवम् उक्त्वा कौत्सर्षिः प्रतिगन्तुम् उद्युक्तः द्वाराभिमुखी सन् चलितः। परन्तु रघुः तं गमनात् निवार्य्य पुनः तम् अकथयत् यत्, वेदविद्यापारगामी सः ब्राह्मणः गुरुदक्षिणार्थं रघुं शरणम् आगत्य अप्राप्तमनोरथः सन् अन्यं दातारं प्रतिपेदे इति मे अपवादस्य नवावतारो मा भूत्। हे भगवन्! होमाग्नित्रयशोभिते मे निर्मले प्रशस्ते अग्न्यगारे त्वं साक्षात् चतुर्थः वह्निरिव निवसन् दिनद्वयं दिनत्रयं वा प्रतीक्षस्व, यावदहं ते कार्यसाधनाय यत्नं करोमि इति।

सत्यशीलस्य रघोः तथा वचनेन सः कौत्सः परां प्रीतीम् अगच्छत्। रघुरपि सकलधनसङ्ग्रहात् वसुधां धनशून्याम् अवलोक्य कुबेरात् तद्देयं धनं बलाद् आहर्तुम् अचिन्तयत्। ततः धैर्यवान् रघुः प्रतिवेशिराजीव एव तस्य बलेन विजयस्य इच्छां कृत्वा शस्त्रैः युक्ते रथे रात्रौ सुप्तवान्। परन्तु कुबेरविजयकामनया सज्जं तं रघुं प्रातः साश्चर्याः तस्य कोषाध्यक्षाः सूचितवन्तः यत्, स्वामिन्! आकाशात् प्रभूता हरिण्यवृष्टिः कोषागारे न्यपतत् इति। रघोः सङ्कल्पं ज्ञात्वा कुबेरः रात्रौ एव तद्गृहे सुवर्णराशिम् अवर्षयत्। सुवर्णाचलस्य वज्रपातस्खलितं पादवमिव प्रकाशमानं तं सम्पूर्णमेव सुवर्णराशिं रघुः कौत्साय अयच्छत्। परन्तु कौत्सः गुरुदक्षिणयाः अतिरिक्तं धनं ग्रहीतुं न सज्जः आसीत्। रघुः अपि सर्वं धनं तस्मै दातुम् आग्रहशीलः आसीत्। ब्राह्मणस्य निःस्वार्थभावं रघोः च औदार्यं दृष्ट्वा सर्वेऽपि अयोध्यावासिनः साश्चर्यम् उभयोः साधुवादं कृतवन्तः।[२६] अथ तम् अकलितं स्वर्णराशिं रघुः उष्ट्रवडवासहस्रैः प्रेषितवान्। कौत्सोऽपि वाञ्छाधिकफललाभात् प्रहृष्टो भूत्वा प्रयाणकाले प्रणामानतशीर्षं तं नृपं करतलेन स्पृशन् अवदत् यत्, सदाचारप्रवृत्तो राजा यत् भूम्याः अभिमतार्थं लभते, न एतत् आश्चर्य्यम्। इदन्तु अत्यन्ताश्चर्यं यत्, भवान् अभीष्टं स्वर्गादपि लब्धवान्।[२७] सर्वर्द्धिसम्पन्नस्य ते किञ्चित् अलब्धं नास्ति। अत एव लब्धलाभाय त्वयि आशीर्वचनं वृथा एव। केवलम् इदमेव आशास्महे वयं यत्, भवान् सर्वगुणसम्पन्नं सुतं लभताम् इति। ततः कौत्सः स्वगन्तव्यं गतः।

अजोपाख्यानस्य आरम्भः

ब्राह्मणाशीर्वादेन अचिरमेव रघोः राजमहिषी गर्भवती अभवत्। ब्राह्मेमुहूर्ते स्वामिकार्तिकस्य समानः पुत्रः समुत्पन्नः। पिता ब्रह्मणः नाम्ना एव तस्य अजः इति नामकरणम् अकरोत्।[२८] यथा दीपात् उत्पादितः अपरो दीपः स्वोत्पादकात् पूर्वदीपात् स्वरूपतो किञ्चिदपि न भिद्यते, तथा स बालोऽपि गुणेन, रूपेण च स्वपितुः रघोः किञ्चिदपि न भिन्नः आसीत्। गुरोः विधिपूर्वकं विद्यार्जनं कृतवान् युवावस्थां प्राप्तः अजः विवाहयोग्यः अभवत्। अथ विदर्भदेशाधिपतिः भोजः स्वभगिन्याः स्वयंवरार्थम् अजम् आनयनाय स्वविश्वासपात्रं दूतं रघुसमीपे प्रेषितवान्। रघुः अपि ससैन्यं कुमारं भोजनगरीं प्रेषितवान्। मार्गे विश्रामाय स्थितस्य रघोः शिविरं केनचित् वनकरिणा आगतम्। सः मदत्वात् अनियन्त्रितः अजस्य सेनासु उत्पातम् अजनयत्। अतः वन्यः गजः अवध्यः इति मन्यमानः अजः अभ्यापतन्तम् अपि तं गजं न अवधीत्। परन्तु शरासनमिषदाकृष्य तं निवर्त्तयितुम् अयोमुखेन बाणेन तस्य कुम्भस्थले विघातम् अकरोत्। अजबाणेन विद्धमात्रः स गजः नागदेहं विहाय गगनविहारि तेजःसम्पन्नं दिव्यरूपं प्राप्तवान्। तद्दर्शनमात्रेण अजसैनिकाः आश्चर्ययुक्ताः अभूवन्। सः दिव्यरूपधारी स्वपरिचयं यच्छन् उक्तवान् यत्, अहं प्रियदर्शनस्य गन्धर्वस्य सुतः अस्मि। पुराहम् अभिमानात् महर्षिमतङ्गं तिरस्कृतवान्, ततश्च तस्य मुनेः शापात् गजत्वं प्राप्तवान्। यदाहं करुणावचनैः तं प्रार्थितवान्, तदा सः मतङ्गः स्वभावसिद्धां करुणां प्रदर्श्य उक्तवान् यत्, इक्ष्वाकुवंशोत्पन्नः अजः यदा लोहाग्रेण बाणेन ते गण्डस्थलं भेत्स्यति, तदा त्वं शापविमुक्तः पुनरपि स्वकीयं शरीरं लप्स्यसे इति। तदाप्रभृति सुचिरं भवदागमनं प्रतीक्षमाणोऽहम् अत्र स्थितः। भवतः प्रसादात् अद्य तस्मात् शापात् निर्मुक्तोऽस्मि। यदि अहं प्रत्युपकारं न करोमि, तर्हि मे स्वस्थानप्राप्तिः वृथा स्यात् इति। एवम् उक्त्वा सः गन्धर्वसुतः अजाय सम्मोहनं नाम गन्धर्वास्त्रम् अयच्छत्, येन अजः शत्रुवधं विनैव जयश्रियं नेतुं शक्नुयात्।[२९] ततः अजः नर्मदायाः पवित्रं जलमाचम्य उदङ्मुखो भूत्वा तस्मात् प्रयोगसंहारसहितम् अस्त्रं स्वीकृतवान्। एवं दैवयोगेन मित्रं प्राप्तवन्तौ गन्धर्वाजौ स्वगन्तव्यम् अगच्छताम्। गन्धर्वसुतः कुबेरस्य उद्यानं प्रति गतः, अजश्च विदर्भदेशं प्रति यात्राम् आरभत।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

यदा विदर्भप्रदेशं प्राप्तवान् अजः नगरस्य समीपे प्राप्तवान्, तदा विदर्भराजः तस्य स्वागताय तत्र सम्प्राप्तः। भोजराजः स्वयं पुरो गत्वा अजं नगराभ्यन्तरम् आनीय प्रासादं प्रति अनयत्। रात्रौ विदर्भराजस्य आतिथ्यं स्वीकृतवान् अजः सूतपुत्राणां सुतितमङ्गलैः जागरितः सन् प्रातःकृत्यं यथाविधिं कृत्वा शृङ्गारसम्पन्नः सन् स्वयंवरसभाम् अगच्छत्।

षष्ठमसर्गः

यदा सभायाम् उपस्थिताः नृपाः अजं दृष्टवन्तः, तदा तेषां मनांसि इन्दुमतीनिराशानि अभूवन्। ततः सः बहुमूल्यमतिश्रेष्ठं सुवर्णसिंहासनम् अधिष्ठितवान्। ततः भोजस्य भगिनी इन्दुमती नृपतीनां समीपे आगता। तस्याः सौन्दर्यातिशयं दृष्ट्वा सर्वे भूपाः अन्तःकरणैः तस्यां निपेतने केवलं शरीरैः आसनेषु संस्थिताः आसन्। पुंवत् भाषिणी द्वारपालिनी सुनन्दा कन्यां क्रमशः मगध-अङ्ग-अवन्ति-अनूप-शूरसेन-कलिङ्ग-पाण्ड्य-देशीयानां नृपाणां परिचयं कारयन्ती अन्ते अजस्य समीपं ताम् अनयत्। कुमारी इन्दुमती तस्य अजस्य दर्शनं कृत्वा अग्रे चलनं स्थगितवती।

पूर्वापरक्रमं ज्ञातवती अर्थात् अजं प्रति इन्दुमत्याः भावं ज्ञातवती सा सुनन्दा इन्दुमतीम् उद्दिश्य अजस्य सविस्तारं (श्लो.७१-७९) परिचयम् आरब्धवती। अजस्य वंशपरम्परां श्रुत्वा तस्य च कमनीयं रूपं दृष्ट्वा इन्दुमती मनसा अजं स्वीकृवती। परन्तु लज्जया किमपि वक्तुं न शक्तवती। अतः तस्याः परिहासं कुर्वन्ती सुनन्दा उक्तवती यत्, हे आर्ये! अग्रे चलावः किम्? इति। तस्याः प्रश्नं श्रुत्वा असूयापूर्वकं वक्रदृष्टिं कृत्वा वधूः इन्दूमती ताम् नेत्रसङ्केतं कृतवती। ततः करभपमोरूः सा इन्दुमती मङ्गलचूर्णेन रक्तगुणमालां मूर्धिधरं प्रेमाणम् इव सुनन्दायाः हस्ताभ्यां अजस्य गलप्रदेशे यथास्थानां सक्तं कारितवती। अतः राजा प्रसन्नः अभवत्, परन्तु अन्ये राजानः रुष्टाः अभूवन्।

सप्तमसर्गः

अथ विदर्भाधिपतिः अजसहितां स्वभगिनीम् इन्दुमतीं नीत्वा पुरं प्रति अगच्छत्। विफलमनोरथत्वात् निराशाः नृपाः शिबिरोन्मुखाः अभूवन्। स्वयंवरकाले इन्द्राण्याः पूजनं भवति, अतः तत्र विघ्नोत्पादनस्य धृष्टतां केऽपि राजानः अकृत्वा शान्त्या अतिष्ठन्। राजमार्गे गजारूढयोः नवदम्पत्योः दर्शनाय नगरजनेषु अत्यन्तः उत्साहः आसीत्। कुतूहलवशात् सर्वेऽपि स्वस्य कार्यं त्यक्त्वा दर्शनाय लालायिताः आसन्। एवं नगरजनानां सत्कारं प्राप्तवन्तः अजादयः प्रासादं प्राप्तवन्तः। भोजराजेन रत्नसिंहासनारूढस्य अजस्य मधुपर्कार्घ्यादिना स्वागतं कृत्वा तस्मै वस्त्रद्वयं (धौतवस्त्रम्, उपवस्त्रं च) दत्तम्। ततः विनीतैः अवरोधरक्षैः सः इन्दुमत्याः पार्श्वे नीतः। तत्र भोजनृपस्य पूजितः अग्नितुल्यः पुरोहितः तस्मिन् स्थाने घृतादिभिः वह्निं हुत्वा तमेवाग्निं विवाहकर्मणि साक्षिणं कृत्वा वधूकुमारयोः विवाहम् अकारयत्। विवाहोत्तरं भोजः अन्येषां नृपतीनां पृथक् सत्कारार्थम् अधिकारिणः आदिष्टवान्। विकारान् हृदि गोपयन्तः सन्तोषं प्रदर्शयन्तः ते राजानः विदर्भराजस्य आज्ञां प्राप्य स्वगन्तव्यार्थं निर्गताः। परन्तु पूर्वमेव दुर्गोष्ठ्या अजस्य मार्गबाधितसङ्कल्पकृताः ते राजानः इन्दुमत्याः अपहरणं कर्तुम् अजस्य मार्गम् अवरोधयन्। पूर्वमेव ते राजानः रघोः दिग्वजये गृहीतधने रघौ प्ररूढवैराः आसन्। अतः ते तत्पुत्रस्य अजस्य स्त्रीरत्नप्राप्तिं सोढुं न शक्तवन्तः।

इन्दुमत्याः अपहरणार्थम् आगतैः राजभिः सह अजस्य भयङ्करं युद्धम् अभवत्। ततः सः प्रियंवदनामकेन गन्धर्वेण प्रदत्तस्य सम्मोहननामकस्य गन्धर्वास्त्रस्य प्रयोगम् अकरोत्।[३०] तस्य अस्त्रस्य प्रहारेण सर्वे राजानः निद्राधीनाः अभूवन्। सर्वेषां राज्ञां ध्वजेषु "अधुना तु रघुपुत्रः अजः यूष्मभ्यं यशः एव अनयत्, परन्तु जीवनदानम् अयच्छत्" एषः सन्देशः रक्तलिप्तबाणानाम् अग्रभागैः लेखितः अजेन। ततः सवधूः अजः अयोध्यां प्राप्तवान्। तस्य आगमनात् पूर्वमेव रघुः मार्गजातस्य युद्धस्य विवरणं ज्ञातवान् आसीत्। अतः प्रशंसनीयस्त्रीयुक्तस्य अजस्य

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |
||Volume 11, Issue 2, February 2022||
|DOI:10.15680/IJIRSET.2022.1102134|

स्वागतं कृत्वा तस्य अभिनन्दनम् अकरोत्। ततः मुक्तीच्छुकः रघुः अजाय राजभारं दत्त्वा वानप्रस्थाश्रमं प्रविष्टः (वनं गतः)।

अष्टमसर्गः

राजसुताः यद्राज्यं विषप्रयोगादिनिषिद्धोपचारैः अपि स्वाधीनं कर्तुं यतते हि स्वतः सभागतं, तद्राज्यम् अजः पितुः आज्ञया स्वीकरोति। वसिष्ठः अजस्य राज्याभिषेकं च कृतवान्। अजः अयोध्याधीषः अभवत्, ततः रघुः सन्यस्तधर्मस्य अनुपालनाय राजप्रासादं त्यक्तुम् उद्यतः। परन्तु अजः प्रार्थनां कृत्वा तस्य गमनं वारयितवान्। रघुः अपि स्वपुत्रस्य इच्छापूर्त्यै प्रासादे न्यवसत् परन्तु कदापि राजलक्ष्याः उपभोगं नाकरोत्।[३१] कालान्तरे रघुः योगसमाधिना परमात्मानं प्राप्तवान्।[३२] अजः पितुः देहोत्सर्गोत्तरं अग्निसंस्काररहिताम् अन्त्येष्टिं संन्यासिभिः सह अकरोत्। कालान्तरे इन्दुमत्याः गर्भात् पुत्रोत्पत्तिना अजः पिता अभवत्। सूर्यसमानस्य यशोयुक्तस्य तस्य बालकस्य नामकरणं दशरथः अभवत्।[३३]
सुपुत्रवान् सः अजः कदाचित् इन्दुमत्या सह नगरोपवने अमरावत्युपकण्ठवने विहारं कुर्वाणः आसीत्। तस्मिन्नेव समये आकाशमार्गेण नारदः गच्छन्नासीत्। तस्य नारदस्य वीणायाः अग्रे निवेशितां दिव्यैः पुष्पैः रचितां मालां वेगवान् पवनः अनयत्। सा दिव्यमाला इन्दुमत्याः स्तनयोः अग्रभागे पतिता। तत्क्षणं सा प्राणान् अत्यजत्। आत्मविहीनं इन्दुमत्याः शरीरं अजस्योपरि अपतत्। अजोऽपि मूर्च्छितः अभवत्। राज्ञः मूर्च्छा तु व्यजनादिसाधनैः दूर्यभवत्। परन्तु औषध्युपायैः अपि इन्दुमत्याः रक्षा नाभवत्। यतो हि तस्मात् पूर्वमेव तस्याः देहः आत्मविहीनः जातः आसीत्। अत्र कालिदासः कथयति यत्, आयौ शेषे सत्येव ओषध्युपायः फलं यच्छति इति।
नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु तथैव संस्थिता।

प्रतिक्रारविधानमायुषः सति शेषे हि फलाय कल्पते।।[३४]
अर्थात्, आयोः अवशिष्टे सत्येव ओषधिः फलप्रदा भवति। पश्चाद् सः मृत्योः अचिन्तनीयं साधनम् अपि अजद्वारा वर्णयति।

कुसमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः।।[३५]
अर्थात् पुष्पाण्यपि शरीरसंसर्गात् आयुरपहर्तुं प्रभवन्ति। यदि हन्त हन्तुम् इच्छतः देवस्य पुष्पं साधनं भवितुम् अर्हति, तर्हि अन्यवस्तु तु निश्चयेन भवेदिति। एवम् अजः इन्दुमत्याः पार्थिवं स्वक्रोडे संस्थाप्य बहुधा विपालम् अकरोत्। ततः इन्दुमत्याः अन्तिमक्रियोत्तरम् अजः केवलं नाममात्रेण जीवितः दरीदृश्यते स्म।[३६] अयोध्याधिपतिं शोकमग्नं दृष्ट्वा यज्ञदीक्षितः विशिष्ठः स्वशिष्यम् अजस्य शोकं भङ्गयितुम् प्रैषयत्।
सः वसिष्ठशिष्यः अजम् उक्तवान् यत्, हे सदाचारशील! सूक्ष्मसन्देशपदा तस्य वसिष्ठस्य वाङ्मयि विद्यते। हे प्रख्यातधैर्यातिशय! तां भारतीं शृणु। एनां वाचं धर्तुं योग्योऽसि त्वम्। त्रिकालज्ञः सः
वसिष्ठेन ज्ञानदृष्ट्या यत् दृष्टं तत् शृणु इति। वसिष्ठर्षिणा सन्देशः प्रेषितः अस्ति यत्, पूर्वकाले तीव्रं तपश्चरतः तृणबिन्धु-नामकात् कस्माद् ऋषेः भीतः शक्रः तपोविनाशिनां हरिणीं नाम देवाङ्गनाम् अस्मै राजर्षये प्रेरितवान्। सः मुनिः तपोविघ्नक्रोधेन प्रकाशितमनोहरविलासां ताम् अप्सरसं मर्त्यलोके मनुष्यस्त्री भव इति शापम् अयच्छत्। तदा सा अप्सरा इन्द्रस्य पराधीना अस्मि इत्युक्त्वा ऋषेः शरणं गत्वा क्षमायाचनाम् अकरोत्। ततः देवपुष्पस्य दर्शनं यावत् त्वं मृत्युलोके निवशिष्यसि इति सः मुनिः अकथयत्। क्रथकैशिकवंशस्य कन्या सा हरिणी दीर्घकालं यावत् तव राजमहिषी आसीत्। शापनिवृत्त्यै पुष्पमालां प्राप्य सा देहम् अत्यजत्। अतः तस्याः देहत्यागस्य शोकः व्यर्थः वर्तते। प्राणिभ्यः विपत्तयः भवन्त्येव। अतः त्वं राजकार्यं पश्य। राज्ञः पृथिव्या एव पत्नीयुक्ताः भवन्ति। ऐश्वरप्राप्तौ सति निन्दादुःखं परिहरता सत्यपि मदकारणे अमाद्यता त्वया यत् अध्यात्मप्रचुरं ज्ञानं प्रकाशितम् आसीत्, तच्छ्रुतं मनःसन्तापे प्राप्ते सति धैर्येण पुनः प्रकाश्यताम्। पण्डितेन सर्वास्ववस्थासु अपि धीरेण भवितव्यम् [३७]। रुदनेन न च मरणोत्तरं परलोके अपि त्वं तां प्राप्तुं न शक्नोषि। यतो हि लोकान्तरं

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

गतानां जीवानां गतिः स्वकर्मानुसारं पृथक् पृथक् भवति [३८]। मृतकस्य पृष्ठे निरन्तररोदनं प्रेतं दुःखीं करोति इति। वसिष्ठर्षेः सन्देशं श्रुत्वा "एवमेव भवतु" इत्युक्त्वा वसिष्ठशिष्यं विसृष्टवान् सः अजः।
अष्टवर्षं यावत् पुत्रस्य पालनं कृत्वा अजः स्वकर्तव्यम् अवहत्। परन्तु प्रियपत्न्याः वियोगे अनन्तो गत्वा प्राणान् त्यक्तुम् ऐच्छत्।[३९] अतः तेन स्वपुत्राय रक्षणविधेः शास्त्रानुसारम् उपदेशः प्रदत्तः, ततश्च शरीरत्यागस्य इच्छया अन्नत्यागस्य व्रतं स्वीकृतम्। ततः अजः गङ्गा-सरयूसङ्गमे तीर्थे शरीरत्यागम् अकरोत्।

नवमसर्गः
अजस्य देहोत्सर्गोत्तरं दशरथः कोसलाधिपतिः अभवत्। तस्य अनेकाः पत्न्यः आसन्। परन्तु तिस्रः पत्न्यः प्रमुखाः आसन्। ताः क्रमेण कौशल्या, कैकेयी, सुमित्रा च। एकदा राजा आखेटाय वनं प्रति अगच्छत्। सः कूपस्य समीपे पशोः जलपानार्थम् आगमनस्य प्रतीक्षां कुर्वन् धनुष्काण्डैः सज्जः स्थितः। समये व्यतीते तत्र मृगाणां कश्चन समूहः सम्प्राप्तः। अतः अश्वारूढः सः दशरथः तस्य समूहं प्रति वेगेन गतवान्। ततः सः हरिणस्य उपरि शरसन्धानम् अकरोत्। परन्तु तस्य सहचरी हरणी बाणस्य सम्मुखे उपस्थिता। अतः दयया सः बाणं नात्यजत्। ततः सः शूकराणां समूहस्य पृष्ठे अगच्छत्। एवं विभिन्नतया आखेटं कुर्वन् सः रात्रौ वनस्थे कुटुरे एव न्यवसत्। द्वितीये दिने सः पुनः आखेटं कुर्वन् तमसानद्याः तटं प्राप्तवान्। तस्याः तमसानद्याः जले घटपूरणात् कश्चन ध्वनिः समुत्पन्नः। सः ध्वनिः हस्तिना जलसंयोगे उद्भूतः इति मत्वा दशरथः शब्दपातिनं (शब्दभेदकं) बाणम् अत्यजत्।



दशरथस्य ऋषिकुमारस्य उपरि शरप्रहारः

नीतिविहीनं तस्य गजाक्रमणकार्यं विपरीतफलदायि अभवत्। युद्धभूमौ अपि अनावश्यकं हस्तिनां हत्या न कर्तव्या इति शास्त्रवचनस्य तेन उल्लङ्घनं कृत्वा बाणं त्यक्तम्।[४०] परन्तु बाणत्यागस्य दिशः "हा तात!" इति चित्कारः समुत्पन्नः। तं चित्कारं श्रुत्वा दशरथः हतोत्साही अभवत्। तस्य चित्कारस्य अनुसरणं कुर्वन् सः अग्रे अचलत्। तत्र तेन शरेण आहतः घटधारी मुनिकुमारः दृष्टः। पीडया विह्वलः सः मुनिकुमारः स्खलितशब्दैः स्वस्य परिचयं दशरथाय अयचछत्। सः उक्तवान् यत्, मम पिता वैश्यः अस्ति। मम माता च शूद्रपुत्री। तयोः अहम् एक एव पुत्रः। तौ समीपे एव स्तः। कृपया मां तत्र नयतु इति। ततः दशरथमुनिकुमारौ वृद्धदम्पत्योः समीपे उपस्थितौ। तत्र दशरथः गजं मत्वा प्रहारं कृतवान् इति स्वस्य दोषम् अङ्गीकृतवान्। तौ मुनिदम्पती अपि बहु विलापम् अकुरुताम्। अनन्तो गत्वा मुनिकुमारस्य शरीरे स्थितं बाणं तस्य पित्रा निष्कासितम्।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

बाणनिष्कासनोत्तरं मुनिकुमारस्य मृत्युः अभवत्। ततः पाणौ जलं गृहीत्वा वृद्धमुनिः दशरथाय शापम् अयच्छत्। सः उक्तवान् यत्, यथा अहं वृद्धावस्थायां पुत्रशोकेन प्राणान् त्यजामि, तथैव तव अपि पुत्रवियोगात् मृत्युः भविष्यति इति। शापं श्रुत्वा दशरथः उक्तवान् यत्, एतावता अहं पुत्रसुखं न प्राप्तवान्। भवतः वचनं निश्चयेन सत्यं भविष्यति, येन अहं पुत्रसुखं प्राप्स्यामि। अतः अनेन शापेन भवता तु मयि अनुग्रहः एव कृतः अस्ति इति।[४१]

ततः दशरथः मुनिं पृष्टवान् यत्, अहं भवतः कृते किं कर्तुं शक्नोमि इति। पुत्रस्य पृष्ठे मुनिः सपत्नी देहत्यागस्य इच्छां प्रागटयत्। अतः तेन एधानकाष्ठानि याचितानि। ततः मुनेः आज्ञायाः पालनं कृत्वा शापं स्वहृदये निगुह्य राजधानीं प्रत्यगच्छत् दशरथः।

दशमसर्गः



रामजन्मः

पृथ्वीं पालयतः दशरथस्य दशसहस्त्रवर्षाणि व्यतीतानि। परन्तु सः पितृऋणमुक्तये पुत्रं न प्राप्तवान्। अतः सः शोकान्धकारे निमग्नः आसीत्। अतः ऋष्यशृङ्गादयः महर्षयः याज्ञिकाः जितान्तःकरणाः सन्तः सुतार्थिनः तस्य दशरथस्य सुतनिमित्ताम् इष्टिम् (पुत्रेष्टिम्) अकुर्वन्। तस्मिन्नेव समये रावणस्य अत्याचारात् पीडिताः देवाः भगवतः विष्णोः शरणं गताः। तत्र तैः परमात्मनः कथागानं कृतम्। ततः देवाः राक्षसानाम् उत्पातस्य विषये विवरणम् अकुर्वन्। ततः भगवान् विष्णुः उक्तवान् यत्, हे देवाः! याज्ञिकैः विधिवदुपहृतं हविर्भागं मायावद्भिः निशाचरैः अनास्वादितं शीघ्रं हि पुनर्ग्रहीष्यध्वे। देवानां मार्गे विमानैश्चरनतः) तोयदावरणतत्पराः पुण्यशालाः दशाननयानावलोकभयं त्यजन्तु। ततः विष्णुः अन्तर्धानः अभवत्।

ततः तस्य दशरथनृपस्य पुत्रकामेष्टेः अवसाने सति अग्नेः कश्चन पुरुषः ऋत्विजाम् आश्चर्यसहितः प्रकटितः। तस्य दिव्यपुरुषस्य हस्ते सुवणपात्रपूरितं पायसम् आसीत्। तत् पायसपूर्णं हेमपांत्रं सः दिव्यपुरुषः दशराथाय अयच्छत्। दशरथः तस्य पायसस्य विभाजनं कृत्वा द्वयोः राजमहिष्योः मध्ये व्यभाजयत्। तस्य नृपस्य कौसल्या मान्या कैकेयी प्रिया आसीत्। अतः नृपः सुमित्रां कौसल्याकैकयीभ्यां भागदानेन मानिताम् इच्छति स्म। उचितज्ञस्य महीपतेः दशरथस्य अभिप्रायज्ञे ते उभे कौसल्याकैकय्यौ चरोरर्धार्धभागाभ्यां तस्यै सुमित्रियै

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

अयच्छताम्। एवं ताभिः तिसृभिः राजमहिषीभिः यज्ञपुरुषेण प्रदत्तः पायसः स्वीकृतः। कालान्तरे ताः गर्भम् अधरन्त। ताः सर्वाः राजपत्न्यः एकदा रात्रौ स्वप्नेषु शङ्ख-खड्ग-गदा-धनुश्चक्रलाञ्छतमूर्तिभिः खर्वैः पुरुषैः रक्षितस्वरूपं ददृशुः।[४२] पत्नीनां स्वप्नस्य विषये ज्ञात्वा दशरथः आनन्दितः अभवत्।

अथ दशरथस्य पतिव्रता ज्येष्ठमहिषी कौसल्या प्रसूतिकाले रात्रौ अन्धकारस्य नाशकस्य प्रकाशस्य कृते औषधिसमानं पुत्रं प्राप्तवती। मनोहारेण शरीरेण प्रेरितो वसिष्ठः दशरथस्य सुतस्य लोकानां प्रथममङ्गलं सुलक्षणं रामः इति नामधेयम् अकरोत्। कैकेय्याः भरतः अभवत्। सुमित्रा लक्ष्मण-शत्रुघ्नौ अजनयत्। शनैः शनैः ते कुमाराः वृद्धिङ्गताः। तेषु कुमारेषु विरोधानाम् अभावः आसीत्।[४३] तुल्येऽपि सौभ्रात्रे यथोभौ रामलक्ष्मणौ प्रेम्णा द्वन्द्वम् आस्तां तथा भरतशत्रुघ्नौ अपि प्रीत्या द्वौ द्वौ साहचर्येण अभिव्यक्तौ आस्ताम्।

एकादशः सर्गः



रामलक्ष्मणौ विश्वामित्रस्य शुश्रूषायाम्ताडकावधम्

विश्वामित्रः दशरथात् लक्षणसहितं रामम् अयाचत्,[४४] यतो हि यज्ञस्य विघ्नोच्चाटनाय तस्य आवश्यकता आसीत्। कष्टेन अपि दशरथः लक्ष्मणसहितं रामं विश्वामित्रेण सह प्रैषयत्। पितुः आज्ञां, मातृणाम् आशीर्वादान् च प्राप्य तौ कुमारौ ऋषेः अनुगमनम् अकुरुताम्। मार्गे विश्वामित्रेण ताडकाकथा श्राविता आसीत्। तया ताडकया निर्जिनकृते मार्गे विश्वमित्रसहितौ तौ कुमारौ अचलताम्।[४५] तस्मिन् मार्गे एव ताडका तेषां सम्मुखे उपस्थिता। तीव्रवेगेण वृक्षान् कम्पयन्ती मृतकचीवरवसा शब्देन उग्रया तया ताडकया श्मशानोत्थया वात्येव भरताग्रजस्य उपरि आक्रमणं कृतम्। यष्टिवत् एकां भुजाम् उपरि उन्नितवतीं, मनुष्याणाम् आन्त्रमेखलां कटिप्रदेशे धृतवतीं च ताडकां दृष्ट्वा नारीवधनिमित्तां जुगुप्सां शरेण सह रामः त्यक्तवान्। (यद्यपि नारी अवध्या। परन्तु आततायिनी न।) रामशरेण तस्याः हृदयं भेदितम्। एवं शरभिन्नहृदया सा भूमौ निपतिता।

ततः रामचन्द्रः मुनेः अनुकरणं कुर्वन् वामनाश्रमं प्राप्तवान्। पूर्वजन्मनि वामनत्वेन जन्मधृतः रामः पूर्वजन्मनः चेष्टां न स्मृतवान् अपि उत्कण्ठितः आसीत्।[४६] ततः सर्वे विश्वामित्रस्य आश्रमं प्राप्तवन्तः। तत्र शिष्येण यज्ञस्य सज्जा कृता आसीत्। एवं विश्वामित्रः यज्ञरतः अभवत्, तौ च दशरथकुमारौ यज्ञरक्षायै सशस्त्रम् इतस्ततः अटन्तौ

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |

||Volume 11, Issue 2, February 2022||

|DOI:10.15680/IJIRSET.2022.1102134|

आस्ताम्। अथ बन्धुजीवस्य पुष्पस्थूलैः रुधिरकरणैः उपहतां वेदिं वीक्ष्य त्यक्तव्यापाराणां स्रुचां त्यक्तन्तः ऋषयः आश्चर्यचकिताः अभूवन्। शीघ्रं हि शरसन्धानाय सज्जः रामः आकाशे राक्षससेनाम् अपश्यत्। तस्यां सेनायां यौ मुख्यौ आस्तां, तयोः रामचन्द्रेण वाय्वस्त्रस्य सन्धानं कृतम्। तेन शरेण ताडकायाः पुत्रं सः अमारयत्। ततः सुबाहुनामकः अपरः राक्षसः आसीत्, स्वमायया इतस्ततः अधावत्। परन्तु श्रीरामः तीक्ष्णबाणैः तस्यापि शरीरस्य अङ्गानि अच्छेदयत्। ततः विश्वामित्रस्य यज्ञः निर्विघ्नेन पूर्णः अभवत्।[४७]



अहल्योद्धारः

यज्ञकर्ता मिथिलानरेशः जनकः विश्वामित्रम् आहूतवान्। अतः विश्वामित्रः रामलक्ष्मणाभ्यां सह जनकपुरीम् अगच्छत्। मार्गे सन्ध्यायाः काले गौतमस्य आश्रमस्य कस्यचित् वृक्षस्य अधः सर्वैः विश्रामः कृतः। तत्र एव गौतमर्षेः पत्नी इन्द्रस्य क्षणमात्रेण भार्या अभवत्। इन्द्रेण अहल्यया सह सङ्गमः कृतः आसीत्, अतः गौतमः अहल्यायै शापं दत्तवान् आसीत् यत्, त्वं शिला भव। रामचन्द्रस्य पादरजैः तव उद्धारो भविष्यति इति। अतः शिलारूपेण स्थिता सा अहल्या रामस्य चरणरजं स्पृष्टवती स्त्रीसुन्दरशरीरं पुनः प्राप्तवती। विश्रामोत्तरं ते यात्रां कृत्वा मिथिलानगरीं प्राप्तवन्तः।

विश्वामित्रस्य आगमनसमाचारान् प्राप्य जनकः स्वागतार्थं समागतः। जनकः तयोः बालकयोः हस्ते धनुष्काण्डं दृष्ट्वा विश्वामित्रम् अपृच्छत् यत्, हे मुने! बृहद्भिः महागजैः अपि दुस्साध्यं यत्कर्म, तत्र कर्मणि बालगजस्य व्यर्थव्यापारचेष्टितं साहसमनुमन्तुमहं नोत्सहे। तयोः स्कन्धयोः भारयुक्तं धनुः वर्तते इति। जनकं प्रत्युत्तरं यच्छन् विश्वामित्रः उक्तवान् यत्, अयं रामः बलेन श्रयताम् अथवा गहिरा सारवर्णनयालं किन्तु अशनिः पर्वत इव धनुष्येव तव दृष्टसारो भविष्यति। ततः रामस्य बलस्योपरि विश्वस्तः सः जनकः सर्वान् नीत्वा राजभवनं प्रविष्टः। ततः सः स्वसेवकेभ्यः धनुः आनेतुम् आज्ञापयत्।

शिवः येन धनुषा यज्ञमृगम् अनुगच्छन्तं बाणं त्यक्तवान् आसीत्, तत् धनुः रामः प्रसुप्तसर्पेन्द्र इव भयङ्करं गृहीतवान्। रामः तत् धनुः सहजतया उत्थापितवान्। तेन रामेण अतिमात्रकर्षणात् भज्यमानं वज्रवद्भीषणशब्दं धनुः दृढक्रोधाय परशुरामाय क्षत्रवंशं पुनरुद्धतं ज्ञापितवत्। अथ जनकः शिवचापे दृष्टबलं धनुर्भङ्गरूपं वीर्यमूल्यम् अभिनन्द्य रामाय देवयजनसम्भवां सीतां साक्षात्लक्ष्मीमिव अर्पितवान्। जनकः ब्राह्मणमाध्यमेन

International Journal of Innovative Research in Science, Engineering and Technology (IJIRSET)
| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |
||Volume 11, Issue 2, February 2022||
|DOI:10.15680/IJIRSET.2022.1102134|

दशरथस्य पार्श्वे निवेदनं प्रेषितवान् यत्, कृपया निमेः कुलकन्यां सीतां स्वपुत्रवधूत्वेन अङ्गीकरोतु इति। दशरथोऽपि रामतुल्यायाः कन्यायाः अन्वेषणे आसीत्। अतः सः झटिति अङ्ग्यकरोत्। ततः ससैन्यं जनकपुरीं प्रति प्रस्थानम् अकरोत्। ततः ताभ्यां राजभ्यां तयोः विवाहः विस्तारितः। अर्थात् न केवलं रामसीतयोः विवाहः अपि तु चतुर्णां भ्रातृणां विवाहस्य आयोजनं कृतम्।[४८]



धनुर्भङ्गः

रामः सीतां परिणीतवान्, लक्ष्मणः तदनुजाम् ऊर्मिलाम् उदवहत् च। भरतशत्रुघ्नौ च जनकानुजस्य कुशध्वजस्य कन्यके माण्डवीं, श्रुतकीर्तिं च उदवहताम्। एवं चतुर्णां पुत्राणां विवाहोत्तरं दशरथः अयोध्यां न्यवर्तत। मार्गस्य वायुः प्रतिकूलः आसीत्। तत्कालम् एव कश्चन तेजस्समूहः सेनायाः पुरतः समुपस्थितः। तेजसा अक्षिणी दर्शनसामर्थ्यं त्यक्तवती।[2] परन्तु शनैः शनैः तस्मात् तेजसः पुरुषाकारः प्रत्यक्षोऽभवत्। ततः परशुरामस्य वर्णनं समायाति। सेनायाः सम्मुखं क्षत्रवंशहन्तारं परशुरामं दृष्ट्वा दशरथः दुःखितः भवति।[४९] सः परशुरामः अर्घ्यम् अर्घ्यम् इति (अर्घ्यं स्वीकरोतु) वदन्तं दशरथम् अदृष्ट्वा रामस्य सम्मुखम् एव क्रोधदृष्ट्या अपश्यत्। ततः युद्धतत्परः सः रामम् उक्तवान् यत्, क्षत्रजातिः मे पितृवधरूपेण अपकारेण द्विपेमी, तत् क्षत्रकुलम् एकविंशतिवारं निहत्य शमं गतोऽस्मि। तथापि सुप्तभुजगो दण्डघट्टनादिव तव पराक्रमस्य श्रवणात् कोपं प्रापितोऽस्मि। अन्यैः नृपैः पूर्वम् अनमितमस्य जनकस्य धनुः त्वं क्षतवान् खलु तद्धनुर्भग्नम् आकर्ण्य भवता आत्मनो वीर्यशृङ्गं भग्नम् इव मन्ये। अन्यस्मिन् काले जगति राम इत्ययं शब्द उच्चारितः सन्माम् एव आङ्गात्, अधुना त्वय्युदयोन्मुखे सति विपरीतवृत्तिः स शब्दो मे लज्जां करोति। अहं द्वौ एव रिपुत्वेन अङ्गीकरोमि। प्रथमः कामधेनोः हर्ता सहस्रार्जुनः, मम कीर्तिहारकं त्वं च।[५०] किं च शैवं धनुः विष्णोः बलेन हृतसारं च जान। तत्र तव कोऽपि परामक्रमः न। तस्मात् मदीयमिदं कार्मुकं ज्या संयोज्य सशरं यथा तथा व्या विकृष्यतां, रणः तावदास्तां धनुष्कर्षणे अपि अहं समबाहुबलेन त्वया जितः। यदि मम परशुधारया भीतोऽसि, तर्हि अभयप्रार्थनां कुरु इति। रौद्ररूपधारिणः परशुरामेण एवम् उक्ते सति सस्मितं किमपि न उक्तवान् श्रीरामः परशुरामस्य धनुः एव स्वीकृतवान्। एवं पूर्वजन्मनः अवतारस्य धनुना युक्तः सः रामः धनोः प्रत्यञ्चाम् अपि अध्यारोपयत्। ततः तस्मिन् धनुंषि अमोघास्त्रम् आरोप्य रामः उक्तवान् यत्, पराजिते सत्यपि त्वयि विप्रत्वात् निर्दयं प्रहारं कर्तुं न शक्नोमि। किन्तु अनेन बाणेन ते गमनं (गतिं) हिन्मि? वा यज्ञार्जितं स्वर्गं हन्मि? इति।

शान्तचित्तः परशुरामः श्रीरामं प्रति विनम्रभावेन उक्तवान् यत्, तत्त्वतः त्वां पुरातनं पुरुषं वेद्मि, किन्तु भुवम् अवतीर्णस्य तव वैष्णवं तेजो द्रष्टुम् इच्छुना मय कोपितः कृतोऽसि।[५१] पितृवैरिणः कोपेन भस्मीकुर्वतः ससागरां भूमिं पात्राधीनां कृतवतः कृतकृत्यस्य मे परमपुरुषेण त्वया कृतः पराजयोऽपि श्लाघ्यः एव। तस्माद् हे मतिमतां

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|| A Monthly Peer Reviewed & Referred Journal |
||Volume 11, Issue 2, February 2022||
|DOI:10.15680/IJIRSET.2022.1102134|

वर! पवित्रतीर्थगमनाय ईप्सितां मे गतिं पालय, किन्तु स्वर्गपद्धतिः भोगनिःस्पृहं मां न पीडयिष्यति इति। रामः अपि तथा अङ्गीकृतवान्। इन्द्रदिङ्मुखः बाणं त्यक्तवान्। येन वर्षाः अभूवन्। रामचन्द्रोऽपि क्षम्यताम् इति वदन् भार्गवस्य चरणौ प्रणनाम। तथा हि विक्रमवतां बलेन निर्जितेषु शत्रुषु प्रणतिरेव कीर्तये भवति।

राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत्।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये।।[५२]
"अहं गच्छामि, सुरकार्यं सम्पादयिष्यतरते विघ्नाभावोऽस्तु" इत्युक्त्वा परशुरामः अन्तर्धानः अभवत्। परशुरामस्य गमनोत्तरं रामस्य क्षेमेण हर्षितः दशरथः तस्य आलिङ्गनम् अकोरत्। ततः यात्रां कृत्वा दशरथः सर्वैः सह अयोध्यां प्रविष्टवान्।
द्वादशः सर्गः



कोपभवनस्य दृश्यम्

